परं-अकं-सेट् ।) ऋ अचीकणत् अचकाणत् । कणति भीतः । इति दुर्गादासः ॥

कण, म गतौ । इति कविकल्पद्रुमः । (भ्वां-परं-सक्-सेट्-घटादि ।) म कणयति । इति दुर्गादासः ॥

कण, क निमीलने । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) निमीलनं पक्ष्मावरणम् । क काणयति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः । इति दुर्गादासः ॥

कणः, पुं, (कणति अतिसूक्ष्मत्वं गच्छति । कण + पचाद्यच् ।) अतिसूक्ष्मः । ("आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः" ।
इति शान्तिशतकम् ५ ॥) धान्यांशः । इत्यमरः । ३ । १ । ६२ ॥ (यथा, मनुः । ११ । ९२ ।
"कणान् वा भक्षयेदब्दं पिन्याकं वा सकृन्निशि" ॥)
तस्य स्त्रीलिङ्गे कणी कणिका । वनजीरकः । इति राजनिर्घण्टः ॥

कणगुग्गुलुः, पुं, (कणश्चासौ गुग्गुलुश्चेति ।) गुग्गुलुप्रभेदः । तत्पर्य्यायः । गन्धराजः २ स्वर्णकणः ३ सुवर्णः ४ कनकः ५ वंशपीतः ६ सुरभिः ७ पलङ्कषः ८ ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । सुगन्धित्वम् । वातशूलगुल्मोदराध्मानकफनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

कणजीरः, पुं, (कणश्चासौ जीरश्चेति नित्यकर्म्मधारयः ।) श्वेतजीरकः । इति राजनिर्घण्टः । (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः ॥)

कणजीरकं, क्ली, (कणं क्षुद्रं जीरकम् । कणजीर + स्वार्थे कन् ।) क्षुद्रजीरकम् । तत्पर्य्यायः । हृद्यगन्धि २ सुगन्धम् ३ । इति रत्नमाला शब्दचन्द्रिका च ॥

कणभक्षकः, पुं, (कणान् भक्षयति भक्षति वा । कण + भक्ष + ण्वुल् ।) भारिटपक्षी । इति राजनिर्घण्टः ॥

कणलाभः, पुं, (कणानां लाभो यस्मात् सः । पेषणसाधनयन्त्रविशेषः स सादृश्येनास्त्यस्य । अर्श-आदिभ्यः अच् ।) आवर्त्तः । इति त्रिकाण्डशेषः । जलेर घूर्णा इति भाषा ॥

कणा, स्त्री, (कण + स्त्रियां टाप् ।) जीरकम् । कुम्भीरमक्षिका । पिप्पली । इति मेदिनी ॥
("द्राक्षां कणां पञ्चमूलं तृणाख्यञ्च पचेज्जले ।
तेन क्षीरं शृतं शीतं पिबेत् समधुशर्करम्" ॥
इति पित्तकासचिकित्सायां वाभटेनोक्तम् ॥)
श्वेतजीरकम् । इति राजनिर्घण्टः ॥ ("कणा स्याद्दीर्घजीरकः" ॥ इति भावप्रकाशः ॥ * ॥) अल्पम् । यथा,—
"कदलीफलमध्यस्थं कणामात्रमपक्वकम्" ।
इति तिथ्यादितत्त्वम् ॥

कणाटीनः, पुं, (कणाय अटतीति । कण + अट + इनन् दीर्घत्वञ्च पृषोदरादित्वात् ।) खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

कणाटीरः, पुं, (कणाय अटति । कण + अट + ईरन् ।) खञ्जनपक्षी । इति शब्दरत्नावली ॥

कणाटीरकः, पुं, (कणाटीर + स्वार्थे कन् ।) खञ्जनपक्षी । इति शब्दरत्नावली ॥

कणादः, पुं, (कणं अत्ति भक्षयति । कण अद + कर्म्मणि उपपदे अण् ।) स्वनामख्यातमुनिविशेषः । तत्पर्य्यायः । काश्यपः २ । इति त्रिकाण्डशेषः ॥ स च वैशेषिकदर्शनकर्त्ता । स्वर्णकारः । कलादो मुकुलकारक इत्यमरोपरि कणाद इत्यपि पाठः । इति सारसुन्दरी ॥

कणिकः, पुं, (कण एव इति स्वार्थे कन् अत इत्वम् ।) कणः । शत्रुः । नीराजनविधिः । इति सारस्वतः ॥ शुष्कगोधूमचूर्णम् । इति राजनिर्घण्टः ॥ (कणा विद्यतेऽस्य अस्त्यर्थे ठन् । स्वार्थे ठन् वा । "नाभेरभूत् स्वकणिकाद् वटवन्महार्भं" इति भागवतम् । ७ । ९ । ३३ ॥ धृतराष्ट्रमन्त्रिविशेषः । यथा महाभारते । १ । सम्भवपर्व्वणि १४१ । २ ।
"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम् ।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः" ॥)

कणिका, स्त्री, (कणाः सन्त्यस्याः । "अत इनिठनाविति ठन्" ५ । २ । ११५ । कणति स्थूलरूपात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः । पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च ।) अत्यन्तसूक्ष्मवस्तु । अग्निमन्थवृक्षः । इति मेदिनी ॥ कणा । तण्डुलविशेषः । इत्यमरटीकायां रायमुकुटः ॥ (जलादीनां सूक्ष्मांशः । यथा, मेघदूते ९९ ।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्" ॥)

कणितं, क्ली, (कण आर्त्तनादे + भावे क्तः ।) पीडितानां शब्दः । इति हेमचन्द्रः ॥

कणिशं, क्ली, (कणो विद्यतेऽस्य इति इनिः तं श्यति । कणि + शो + कः । यद्वा कणिनः शेरतेऽस्मिन् । कणिन् + शी + डः । कणाः सन्त्यस्य इत्यमरटीकाकृत् ।) शस्यमञ्जरी । इत्यमरः । २ । ९ । । २१ । धान्यादिर शिष इति भाषा ॥

कणी, स्त्री, (कण + स्त्रियां ङीप् गौरादित्वात् ङीष् वा ।) कणिका । इत्यमरटीकायां भरतः ॥

कणीकं, त्रि, (कण + ईकन् ।) अल्पम् । इत्युणादिकोषः ॥

कणीयः, [स्] त्रि, (कण + ईयसुन् ।) अत्यल्पम् । इत्यमरः ॥ कनिष्ठम् । इति तट्टीका ॥ (यथा हठयोगदीपिकायां । २ । १२ । "कणीयसि भवेत् स्वेदः कम्पो भवति मध्यमे" ॥)

कणेरः पुं, (कण + एरप्रत्ययः ।) कर्णिकारवृक्षः । इत्युणादिकोषः ॥

कणेरा, स्त्री, (कण + एरष्टाप् च ।) वेश्या । हस्तिनी । इत्युणादिकोषः ॥

कणेरुः स्त्री, (कण + एरु ।) वेश्या । करिणी । कर्णिकारवृक्षे पुं । इति मेदिनी ॥

कण्टकः, पुं, क्ली, (कण्टति इति कटि ण्वुल् । अर्द्धर्चादि पां २ । ४ । ३१ ।) क्षुद्रशत्रुः । (यथा विष्णुपुराणे १ । १९ । ३१ । "प्रह्लादः कथ्यतां सम्यक् तथा कण्टकशोधने' ॥) मत्स्याद्यस्थि । नैयायिकादिदोषोक्तिः । रोमाञ्चः । द्रुमाङ्गम् । इति मेदिनी ॥ काँटा इति भाषा ॥ (तथा चोक्तं चाणक्यशतके २२ ।
"उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम्" ॥)
केन्द्रम् । इति दीपिका ॥

कण्टकः, पुं, (कटि + ण्वुल् ।) सूच्यग्रम् । क्षुद्रशत्रुः । (यथा, मनुः । ९ । २५२ ।
"सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः ।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्" ॥)
लोमहर्षः । इत्यमरः ३ । ५ । ३२ ॥ कर्म्मस्थानम् । दोषः । इति जटाधरः ॥ मकरः । इति विश्वः ॥ वेणुः । इति हेमचन्द्रः ॥ (लोकोपद्रवकारी । यथा, भागवते । ३ । १८ । २३ ।
"अन्वेषन्नप्रतिरथो लोकानटति कण्टकः" ॥)

कण्टकद्रुमः, पुं, (कण्टकप्रधानो द्रुमः । कण्टकेनाचितो द्रुमो वा ।) शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥ (यथा मृच्छकटिके । १४० । ४ ।
"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः" ॥
"दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः" ।
इति भागवतम् । ७ । ५ । १७ ॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः ॥)

कण्टकप्रावृता, स्त्री, (कण्टकैः प्रावृता व्याप्ता । कण्टक + प्र + आ + वृ + कर्म्मणि क्त + टाप् ।) गृहकन्या । इति राजनिर्घण्टः । घृतकुमारी इति भाषा ॥

कण्टकफलः पुं, (कण्टकैराचितं व्याप्तं फलं यस्य । शाकपार्थिवादिवत् मध्यपदलोपी समासः ।) पनसवृक्षः । इत्यमरटीकायां भरतः ॥ गोक्षुरवृक्षः । इति रत्नमाला ॥ (अस्य गुणादयः कण्टाफलशब्दे ज्ञेयाः ॥)

कण्टकवृन्ताकी, स्त्री, (कण्टकाचिता वृन्ताकी । शाकपार्थिवादित्वात् मध्यपदलोपश्च ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

कण्टकश्रेणी, स्त्री, (कण्टकानां श्रेणिर्यत्र । श्रेणी यस्यां वा ।) कण्टकारी । इति शब्दचन्द्रिका ॥

कण्टकागारः, पुं, (कण्टका आगारो यस्य । यद्वा कण्टकं आगिरति । आ + गॄ + अच् ।) सरटजन्तुः । इति राजनिर्घण्टः ॥

कण्टकाढ्यः, पुं, (कण्टकैराढ्यः ।) कुब्जकवृक्षः । इति राजनिर्घण्टः ॥

कण्टकारिका, स्त्री, (कण्टकान् इयर्त्ति ऋच्छति वा कण्टक + ऋ + कर्त्तरि + ण्वुल् । स्त्रियां टाप् इत्वं च । यद्वा कण्टकं ऋच्छति + ऋ कर्म्मण्यण् ततः कन् च ततः प्राग्वत् । तत्फले तु अणि कृते हरीतक्यादित्वात् लुक् ।) स्वनामख्यातक्षुद्रवृक्षः । तत्पर्य्यायः । निदिग्धिका २ स्पृशी ३ व्याघ्री ४ बृहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुष्पर्शा ९ राष्ट्रिका १० । इत्यमरः ॥ अनाक्रान्ता ११ भण्टाकी १२ सिंही १३ धावनिका १४ । इति रत्नमाला ॥ कण्टकारी १५ कण्टकिनी १६ दुःप्रधर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बहुकण्टा २१ क्षुद्रफला २२ कण्टा-